श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये त्रिंशं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये त्रिंशं दशकम् ॥

## वामनावतारवर्णनम्

शक्रेण संयति हतोऽपि बलिर्महात्मा
    शुक्रेण जीविततनुः क्रतुवर्धितोष्मा।
विक्रान्तिमान् भयनिलीनसुरां त्रिलोकीं
    चक्रे वशे स तव चक्रमुखादभीतः ॥ **30.1** ॥

पुत्रार्तिदर्शनवशाददितिर्विषण्णा
    तं काश्यपं निजपतिं शरणं प्रपन्ना।
त्वत्पूजनं तदुदितं हि पयोव्रताख्यं
    सा द्वादशाहमचरत् त्वयि भक्तिपूर्णा ॥ **30.2** ॥

तस्यावधौ त्वयि निलीनमतेरमुष्याः
    श्यामश्चतुर्भुजवपुः स्वयमाविरासीः।
नम्रां च तामिह भवत्तनयो भवेयं
    गोप्यं मदीक्षणमिति प्रलपन्नयासीः ॥ **30.3** ॥

त्वं काश्यपे तपसि सन्निदधत्तदानीं
    प्राप्तोऽसि गर्भमदितेः प्रणुतो विधात्रा।
प्रासूत च प्रकटवैष्णवदिव्यरूपं
    सा द्वादशीश्रवणपुण्यदिने भवन्तम् ॥ **30.4** ॥

पुण्याश्रमं तमभिवर्षति पुष्पवर्षै -
    र्हर्षाकुले सुरगणे कृततूर्यघोषे।

बध्वाऽञ्जलिं जय जयेति नुतः पितृभ्यां
त्वं तत्क्षणे पटुतमं वटुरूपमाधाः ॥ **30.5** ॥

तावत्प्रजापतिमुखैरुपनीय मौञ्जी -
दण्डाजिनाक्षवलयादिभिरर्च्यमानः।
देदीप्यमानवपुरीश कृताग्निकार्य -
स्त्वं प्रास्थिथा बलिगृहं प्रकृताश्वमेधम् ॥ **30.6** ॥

गात्रेण भाविमहिमोचितगौरवं प्रा -
ग्व्यावृण्वतेव धरणीं चलयन्नयासीः।
छत्रं परोष्मतिरणार्थमिवादधानो
दण्डं च दानवजनेष्विव सन्निधातुम् ॥ **30.7** ॥

तां नर्मदोत्तरतटे हयमेधशाला -
मासेदुषि त्वयि रुचा तव रुद्धनेत्रैः।
भास्वान् किमेष दहनो नु सनत्कुमारो
योगी नु कोऽयमिति शुक्रमुखैश्शशङ्के ॥ **30.8** ॥

आनीतमाशु भृगुभिर्महसाऽभिभूतै -
स्त्वां रम्यरूपमसुरः पुलकावृताङ्गः।
भक्त्या समेत्य सुकृती परिणिज्य पादौ
तत्तोयमन्वधृत मूर्धनि तीर्थतीर्थम् ॥ **30.9** ॥

प्रह्लादवंशजतया क्रतुभिर्द्विजेषु
विश्वासतो नु तदिदं दितिजोऽपि लेभे।
यत्ते पदाम्बु गिरिशस्य शिरोभिलाल्यं
स त्वं विभो गुरुपुरालय पालयेथाः ॥ **30.10** ॥

॥ इति श्रीमन्नारायणीये त्रिंशं दशकं समाप्तम् ॥